ति श्रुतिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध्यत इति भगवता व्यासेन निर्णीते कथं सङ्गच्छतेताम् । उच्यते जीवस्यैव
न। तैयत्वे प्राप्तिकर्मत्वमपि वाच्यम् । कर्तृत्वं च तस्याख्यातेनोक्तम् । नैवैकस्यैकदा सत्ताद्वयं युक्तम् । कर्तृसत्त
या कर्मसत्ताया बाधात् । तथा चैतमिति द्वितीया न स्यात् । कर्मकर्तृताया च यत्र यत्रापत्तिरिति तिष्ठतु विभेदहेतु रोधः
समेदहेतुः । पचं च व्यापाराश्रयस्य धात्वलभ्यत्वादाश्रयमात्रं हेतौ तृतीयार्थः । कारकचक्रप्रयोक्तृत्वं कर्तृसामान्यत्वे
वादरणः करोतीत्यत्र व्याप्तम् । अयं च द्विविधः शुद्धः प्रयोजको हेतुः कर्मकर्ता च । यथा हरिः सेव्यते कार्यते
हरिणा गमयति कृष्णो गोकुलम् । सदभिन्नाश्रयकोऽहरिकर्मकसेवनानुकूलो व्यापारः । हर्येभिन्नाश्रयक उ
त्पादनानुकूलो व्यापारः । गोकुलकर्मकगमनानुकूलकृष्णाश्रयकव्यापारानुकूलो व्यापार इति णिचा बोधः ।
करणे तृतीयायाः स्वाश्रयव्यापारो वाच्यो । तथाहि साधकतमं करणम् । तमबर्थः प्रकर्षः । स च व्यवधानेन
फलजनकव्यापारवत्ता । तादृशव्यापारवत्कारणं च करणम् । उक्तं च वाक्यपदीये । क्रियायाः परिनिष्पत्तिर्य

वै॰भू॰
११

द्व्यापारादनन्तरम् । विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् । वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् । स्था
ल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति ॥ विवक्षासत्त्वेन न सहकृदन्ते केषां तद्भावोक्ता हितीयासम्पादेरवका
शं सूचयति । न चैवं कर्तृत्वापार्थे बन्धादित्वं तरमीमांसाधिकरणे श्रान्तिविपर्ययादिति सूत्रेणान्तःकरण
स्य कर्तृत्वे करणत्वाश्रान्तिविपर्ययापत्तिरुक्ता न युज्येतेति वाच्यम् । तदेतत्प्रमाणेनो विज्ञानेन विज्ञानमादा
येति श्रुत्यन्तरे करणत्वाभ्युपगमस्य कर्तृत्वाप्रकृत्यश्रान्तिविपर्ययापत्तिनिष्प्रमाणकल्पनतराभिप्रायात् ।
वस्तुतस्तु भृशुश्चाध्यमात्रमेतदिति यथा चैतल्लाभ यत्नेत्वधिकरणे भाष्यपूर्वपक्षग्रन्थादिप्रपञ्चितं भूषणे ।
सप्तम्या आश्रयोऽर्थः । सप्तम्यधिकरणे चेत्यधिकरणे सप्तमी । तच्चाधारोऽधिकरणमिति सूत्रादाधारः । तच्चा
श्रयत्वम् । तत्राश्रयाश्रः सत्त्वमवश्यकम् । न चाश्रयत्वमात्रेण कर्तृकर्मकरणानामाधारसंज्ञा स्यात् । स्या
देव यदि ताभिरस्यान्न बाधः स्यात् । कर्मकेत्याधिकत्वविहितसप्तम्याः क्रियाश्रयस्यैव यद्यपि तात्पर्यं तथा
पि तत्र कर्तृकर्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादेः । तल कटादेश्चेति स्थाल्यां पचति भूतले वसति कटे शेते इ
त्याद्युपपद्यते । उक्तं च वाक्यपदीये कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् । उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधि
करणं स्मृतम् । एतच्च त्रिविधम् औपश्लेषिकं वैषयिकमभिव्यापकं च । कटे शेते गुरौ वसति मोक्षे इच्छास्ति तिले
ष्वैतलमिति । एतच्च संहितायामितिसूत्रे भाष्ये स्पष्टम् । अवधिः पञ्चम्यर्थः । अपादाने पञ्चमी । तच्च ध्रुवमपा
येऽपादानमिति सूत्राद्यो विश्लेषजनकक्रिया तत्रावधिभूतमपादानमित्यर्थकादवधिभूतमिति भा
वः ॥ उक्तं च वाक्यपदीये कर्तृकर्मव्यवहितामसाक्षाद्धा । अपाये यदुदासीनं चलं वा यदि वाचलम् । ध्रुव
मेवातदावेशात्तदपादानमुच्यते । पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ । तस्याप्यश्वस्य पतने कुड्यादि ध्रु
वमुच्यते । उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे । विभागे प्रविभक्ते तु क्रिये तत्र ध्रुवाविति । मेषान्तरक्रियापेक्ष
मवधित्वं पृथक्पृथगिति । अस्यार्थः । अपाये विश्लेषहेतुक्रियायामुदासीनमनाश्रयः । अतदावेशात् तत्क्रि
यानाश्रयत्वात् । एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम् । वृक्षात्पर्णं पततीत्याद्या
वस्तु विश्लेषजनकक्रियाश्रयत्वेऽपि तत्र विरुद्धमित्याह यस्मादश्वादिति । तद्विश्लेषहेतुक्रियानाश्रयत्वेऽस
^ तीसमनुदासीनत्वमस्यायम् धावतोऽश्वात्पततीत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषहेतुक्रियेति ऊ ग्रामयतत्नोऽश्वात्पततीत्यत्र ^

विश्लेषजनकक्रिया नाश्रयात् =

परस्पर ... दपतरत्नः
११

नीति विशेषणीयमिति भावः एवमप्यनिष्टक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह तस्यापीति उभय
कर्मजविभागस्थले विभागस्यैकत्वात् द्विष्ठजनकक्रियानाश्रयत्वाभावात् परस्परमेषापसरत इति तस्या
दित्याशङ्क्य समाधत्ते उभावपीति मेषान्तर इति यथा निश्चलमेषादपसरद्द्वितीयमेषस्य तन्निश्चलमेषस्या
पसरन्मेषमादाय ध्रुवत्वमिति तथात्रापि विभागैक्येपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वमिति तथा
च विशेषणाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वं वाच्यम् क्रिया चात्र धात्वर्थो न तु
स्पन्दः तेन दृक्कर्मजविभागवति वृक्षे हस्तात्पततीति स[illegible] वस्त्रतो नैतावतश्च ध्रुवत्वं वाच्यम् किं च
अवधेर्लक्षणमात्रस्य द्वितीयार्थोक्तरीत्या प्रयोगातिप्रसङ्गस्यासम्भवेन वाच्यकोटौ प्रवेशस्य गौरवेणासम्भ
वादिति प्रतिभाति नन्वेवमपि हलात्स्पन्दत इति स्यादिति चेन्न ग्रामस्य नाबलितो राज्ञा [illegible] इति वदि
त्वात् एतेन पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोपास्तः
नन्वेवमपि वृक्षात्त्यजतीति दुर्वारम् कर्मसंज्ञया अपादानसंज्ञाया बाधेन पञ्चम्या असम्भवात् [illegible]
प्रयोगे यदि बाधाभावोऽनुभवसिद्धस्तर्हि पञ्चमीजन्यापादानत्वबोधे ज्यादिभिन्नधातुजन्योपस्थितेर्हेतुत्व
वाच्यम् बलाहकाद्विद्योतत इत्यादौ निःसरणमध्याहार्यम् रूपरसात्मयमित्यत्र बुद्धिपरिकल्पितमपा
दानत्वं द्रष्टव्यम् पृथग्विनेति पञ्चमी वा इदं च निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा अपेक्षितक्रियं
चेति त्रिधापादानमुच्यत इति वाक्यपदीयात्त्रिविधम् यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयं य
था ग्रामादागच्छति धात्वन्तरार्थाङ्गं स्वार्थं यत्राह तदुपात्तविषयम् यथा बलाहकाद्विद्योतते निःसरणा
ङ्गविद्योतने वृत्तिर्वर्तते अपेक्षितक्रिया यत्र तदन्तिमम् यथा कुतो भवान् पाटलिपुत्रात् आगमनमर्थ
मध्याहृत्यान्वयः कार्यः उद्देश्यपञ्चत्वं [illegible] तथाहि सम्प्रदाने चतुर्थी तच्च कर्मणा यमभिप्रैति स सम्प्रदानमि
ति सूत्रात्कर्मणा करणभूतेन यमभिप्रैति इत्यनेन कारकं सम्प्रदानमित्यर्थकाद् उद्देश्यः इदमेव शेषित्वम्
तदुद्देश्यकेच्छाविषयत्वं च शेषत्वमित्येवं पूर्वं तन्त्रे निरूपितम् अत एव बुभुक्षवे [illegible] मैत्रावरुणाय दण्डप्रदान
मित्यधिकरणे अग्नीषोमौ मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्डदानं चतुर्थी [illegible] त्यार्थकर्मेति तत्र नि
र्णीतम् रजकाय वस्त्रं ददातीत्यापि स्वत्वविरहिके [illegible] अपादानेति भाष्योदाहरणादि [illegible]

अत्र संयोगानुकूलो व्यापारो ददात्यर्थः

[illegible] निष्टस्वत्वनिरूपको विशेषणत्वाविनी
[illegible] व्यापारो विप्रोद्देश्यकः =४

उक्तावधित्वानतिप्रसङ्गापा [illegible] नैव नाभाद्
[illegible] विभागस्वरूपस्य [illegible]

[illegible]

[illegible] निःसरणपूर्वकप्रका [illegible]

[illegible] प्रसिद्धागमनं [illegible] तिन [illegible] पेक्षितक्रियम्

[illegible]

तत्रविषयः [illegible]

दानकर्म: सन्बन्धगोर्ब्राह्मणायदीयते

हत्तिकारास्तु सम्यक्प्रदीयते यस्मै स संप्रदानमित्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो रजक
स्य वस्त्रमित्येवाहुः इदं चानिराकरणात्कर्तृत्यागाङ्गं कर्मणेप्सितम् प्रेरणानुमतिभ्यां च लभते संप्रदानतामि
ति वाक्यपदीयात्त्रिविधम् सूर्यायार्घ्यं ददातीत्याद्यम् नात्र सूर्यः प्रार्थयते नानुमन्यते न निराकरोतीति प्रेरकं
विप्राय गां ददाति अनुमन्तृ उपाध्यायाय गां ददाति अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः विभक्तीनां
धर्मिवाचकत्वात् धर्ममात्रवाचकत्वे कर्मणि द्वितीयेति सूत्रस्वरसभङ्गापत्तेः कर्माद्येकत्वद्वित्वादिना बोधापा
दर्शनाच्च द्वितीयासुपर्थकबहुव्रीहौ प्राप्तोदक इत्यादौ धर्मिवाचकतालाभाच्च सुपां कर्मादयोऽप्यर्थाः स
ङ्ख्या चैव तथा तिङां मूलिभाष्याद्वेतिदिक् आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता किन्त्वाश्रयत्वमात्रं
वाच्यं तत्रैव च तादात्म्येनान्वयादेवं करणतृतीयाया व्यापारः पञ्चम्या विभागमात्रं चतुर्थ्या उद्देश्यत्वमा
त्रमत एवाहकृत्याधिकरणमपि न विरुध्यत इत्याधेयत्वमाह माक्तिरेवेति षष्ठ्यामपीति शेषः शेषषष्ठ्याः स
म्बन्धस्याः सम्बन्धमात्रवाच्याम् कारकषष्ठ्यास्तु शक्तिरेवेत्यर्थः सप्तमीपञ्चम्यौ कारकमध्ये इति सूत्रे शक्तिः
कारकमिति पतत्स्यभाष्ये दर्शनात् एवं च देवदत्तस्य गोर्ब्राह्मणाय गेहादङ्गणे हस्तेन मया दीयत इत्यत्र
देवदत्तसंबन्धिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठविभागजनकोऽङ्गणा
धिकरणको हस्तकरणको मन्निष्ठो व्यापार इति बोधः यथायथम् उक्तप्रकारेण । सूत्रमानमुपदर्शयन्नु
दं जानातीत्यादौ द्वितीयाया विषयतायां लक्षणेति वदन्तो नैयायिकरीत्याह सुपां कर्मेती
ति अयं भावः सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम् प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु चेति
वार्तिकतद्भाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः तथाहि स्वौजसमौट्कर्मणि द्वितीया द्वेक
योर्द्विवचनैकवचने इत्यादेः तस्यातिप्रसक्तिनाप्येकवचनद्विवचनेत्यादेरेकत्वान्वयात्कर्मादेस्तु सङ्ख्याया
अवाच्यता लभ्यते द्वितीया कर्मण्येव तृतीया करण एवेत्येवमादिदृष्टो नियमः कर्मणि द्वितीयैव कर
णे तृतीयैवेत्यादिर्नियमश्च उभयथापि सिद्धनियमविरुद्धं लक्षणादिकमसाधुत्वप्रयोजकमिति यो नैक
र्मणि नात्ततेन वर्देहितिनिषेधविषयोऽपि भवत्येवेति स्वेच्छया लक्षणापि विभक्त्या न प्रयोजिकैव अत एव विभ
क्तौ न लक्षणेत्यादि नैयायिकरुद्धानामव्यवहार इति दिक् । २४ । इति श्रीवैयाकरणभूषणसारे सुबर्थनि
र्णयमादि ॥

आश्रयत्वं आश्रयत्वनिष्ठ वाच्यतावच्छेद कम्

आश्रयत्वमपिनः निष्ठ

ततः कर्मणीति नियमतिनियमश्च द्वितीयेत भवते ॥

अर्थेषु

गृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामतीति न्यायशरीरम् =

र्णयः ॥ नामार्थानाह एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः
॥ १ ॥ एकं जातिस्तावदेव तस्या एव वाच्यत्वौचित्यात् अनेकव्यक्तीनां वाच्यत्वे गौरवात् न च व्यक्तीनामविषयत्वे
कथमेकत्वादिनिगमनाविरहः एवं हि एकस्या एव व्यक्तेः शक्त्याभ्युपगमेऽप्यनन्तरलक्षणया स्वसमवे
ताश्रयत्वसंसर्गेण निर्गौरवम् जात्यान्तःसहाश्रयत्वमेव संसर्ग इति लाघवम् किं च विशिष्टवाच्यत्वमपेक्ष्य
नागृहीतविशेषणन्यायाज्जातिरेव वाच्येति युक्तम् व्यक्तिबोधस्तु लक्षणया एवं च तत्तद्विभक्त्यर्थान्वयो
ऽप्युपपद्यत इति दिक् यद्वा केवलव्यक्तिरेवैकः शब्दार्थः केवलव्यक्तिपक्ष एवाग्रहणस्यैकशेषस्य चारम्भ
णात् तस्यापि शास्त्रसिद्धत्वात् पूर्वं चैतद्व्यवहारेणाव्यक्तावेव तद्ग्रहणात् सबन्धितानवच्छेदकस्यैव जातेरेव
व्यक्तिरप्येकैवेति न गौरवमपि न चैवं तट्त्वमपि वाच्यं स्यात् कुम्भाकाल्पनावच्छेदकत्वात् तथा च नागृहीतविशेष
णन्यायात् तदेव वाच्यमस्त्विति शङ्क्यम् अकारणत्वेऽपि कारणतावच्छेदकत्ववद्दलत्वेऽपि तत्त्वतावच्छेद
कत्ववत्तयाज्ञापि सम्भवात् उक्तं च आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् शब्दः सकरसंबन्धो न च व्या
भिचरिष्यतीति । वस्तुतस्तु नव्याकृतिपदार्थस्पष्टत्वेन पदार्थ इति भाष्यादिशिष्टवाच्यम् एकमिति समु
दायमभिप्रायः शक्तिज्ञाने विषयतया वच्छेदिका जातिरेव तथा च लघुत्वविशिष्टबोधे पेक्षत्वम् प्रो न्यायम
कारकत्वस्य शक्तिज्ञानत्वेन हेतुत्वेनेति कार्यकारणभावस्यादिप्रपञ्चितं भूषणे तदेतदभिप्रेत्याह द्विक
मिति जातिव्यक्ती इत्यर्थः त्रिकमिति जातिव्यक्तिलिङ्गानीत्यर्थः सत्त्वरजस्तमोगुणानां साम्यावस्थानपुंस
कत्वम् आधिक्यं पुंस्त्वम् अपचयः स्त्रीत्वम् तन्नैवं इति हेतुद्दार्शं च तमेव विरुद्धधर्ममादायतटादिशब्दे
ष्वभिधाने केषांचिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात् एवं च पदार्थप
देपुंस्त्वमेव व्यक्तिपदे स्त्रीत्वमेव वस्तुपदे नपुंसकत्वमेवेति सर्वं ग्राह्यं पदार्थः इयं व्यक्तिः इदं वस्त्विति व्य
वहारस्तु तटस्तटी तटमितिवोपपद्यते न च लिङ्गमर्थपरिच्छेदकत्वेनान्वेतीति पक्षादिशब्दो दोषे पक्षाः स्त्रि
यो नाम्नीति पक्षे नेत्यादिविधिर्निष्ठा नपादीनङ्गत्वेन प्रयोजयतीति विभावनीयम् न च लोकत्या विशेषो लि
ङ्गस्य वपुस्त्वादिपर्यायोऽपि कस्यापि साधारणमप्यावश्यम् व्यक्तिग्राहस्य नित्यस्त्रीलिङ्गत्वेन तथासम्भवेऽपि पशु
ग्राहस्य नित्यपुंलिङ्गत्वे प्रमाणाभावात् पश्वानयपुंग्राहाच तत्त्वम् पशोऽन्योऽयपशु गो वेदमादिवेदर्शना

जातौ शक्त्यभ्युपगमे व्यक्तौ लक्षणायां जात्याश्रयत्वसंबन्धः = ४

व्यक्तिभेदे वृत्त्यनन्तकल्पनम् =

अनुगतानेकव्यक्तौ शक्तत्वेनावच्छेदकत्वसम्भवात् = १

नतादीनाम् =

स्त्रीपुरुषयोः

व्यक्तिसमवेत जात्याश्रयत्व =

शक्तिः =

दण्डत्वादेः =
नीलत्वादेः =
घटत्वादिकम् =

पुंलिङ्गं

स्त्रीपुरुषयोः धारतम्यसम्भवेऽपि

वै.भू.
१३

13

अप्रधाने

त्वं मीमांसायां च तदर्थं पशुनायजेतेत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वाज्ञानेकपशुभिः पश्वा स्त्रिया वा याग इति प्रति
पादितत्वाच्च वस्तुतस्तु विशेषविध्यभावे उपमयाज्ञानात्पुंस्त्वस्य व्याकरणेनिर्णीतत्वाद्द्विदशाच्यो पि जसादिषु
छन्दसि वा वचनमिति नाभावाभावशङ्काः पशुशब्दस्य नियमं पुंस्त्वनिर्णयात् प्रकृते पशौ व्यक्तिरादृत्येतप
शापशुनेत्यप्रयोगात् यत्रापि पशुशब्दमात्रमनिर्णीतलिङ्गमस्ति तत्रापि छागो वा मन्त्रवर्णादिति न्यायेनैव
निर्णयः मन्त्रवर्णे हि छागस्य वपाया मेदस इति श्रूयते तत्र छागस्येति छागणामसम्भावितमिति भवति ततः
पुंस्त्वनिर्णय इति विस्तरेणाग्रपश्चिनभूषणे चतुष्कम् सङ्ख्यासहितं त्रिकमित्यर्थः पञ्चकम् कारकसहितं
चतुष्कमित्यर्थः अन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यम् ननु तत्तल्लिङ्गादीनामुपस्थितेः प्रकृतिवाच्यत्वे
मानाभावाच्चेन्निचेत्सत्यम् प्रत्ययवर्जितेऽपि पञ्चम्यादौ प्रत्ययमजानतोऽपि बोधात्प्रकृतेरेव वाचकत्वं कल्प्य
ते लिङ्गानुशासनेनापि बोधात्प्रकृतेरेव तद्दर्शनाच्चेति अत एवैषु पदेषु न निर्बन्धः प्रत्ययस्यैव वाचकता
यायुक्तत्वात् द्योतिकावाचिकावास्तु द्वित्वादीनां विभक्त्यर्थ इति वाक्यपदीयेऽपि पक्षद्वयस्य समादानात् शास्त्र
ति वक्ष्यमाणस्य सुप्तिङ्नुत्पादनयोग्यतिनम् प्राधान्येन सरूपसन्न्यासो युक्तम् १। पादस्यावच्छेद्बोधे भासते
न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते अनुविद्धमिव ज्ञानं सर्वं शब्देन भासत इत्युक्त्यानुभाविकोक्तेः विस्तु
मुच्चारयत्याशे वृयोच्चारणासम्भवेनोत्तिनार्थविषयशाब्दबोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः न
वलक्षणयानिर्वाहः निरूढलक्षणायाः शक्त्यनतिरेकात् जेबगउदशमुच्चारयेत्याद्दौ शक्यग्रहणेशाक्य
सम्बन्धस्य लक्षणायाश्च ग्रहाच्च ग्रज्ञाता याश्च हेतेरनुपयोगात् गामुच्चारयेत्यादिष्व ज्ञाना मनुकरणेऽस
धुतासप्रति पत्तेस्त्वशक्त्याभावेनपरनयेलक्षणायाश्च सम्भवाच्चेत्यपि मृत्यषो द्वापि कश्चित्प्रातिपदिकार्थः
तारः। पाहोऽपि यहिभेदेनाविवक्षा स्यान्नदानथा नोचक्रोशादिभिः सिद्धोऽपसावर्थे वभासते २। यद्यनुका
र्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः यदि नभेदविवक्षा तदा अनुकार्यादिरूपोपस्थितोऽपि
अर्थवद्भासते अपि हेतो अयाश्रितत्वाद्भासतइत्यर्थः अयंभावः अनुकार्यानुकरणयोर्भेदे नुकार्यस्यपद
त्वोपस्थितत्वान्नसिद्धये नाभिरूपेया अभेदेऽप्यन्यतो विषयस्य हेतवा न्वयप्रत्यस्तत्र पायदजन्योपस्थितिमा
दायशाब्दबोधविषयतोपपत्तिरिति यद्यप्यतिप्रसङ्गः स्वारणायहानिजन्यपदोपस्थितिरेव हेतुस्तथाप्यत्रा

= पद्दितापादेष्वनिमपत्ववर्णमयलाभ्याम् भुवो वुगित्यादौ दृष्टपदार्थकत्वशब्दपदार्थकत्वाभ्याममनुकार्यानुकार्ययोर्भे
द विवक्षा = ४ तथाच हृत्यार्थवोधकत्वेन प्रातिपदिकार्थत्वादनुकरणेभ्योऽपि विभक्त्युत्पत्तिरिति भावः = ४
शाब्दभानानुपपत्ता - इत्यादिव घरात्ययतद्यं - २

इदमेवपतं युक्तो
नियमिति देशीन
मायः =

अनुकरणस्थले =
अनुकरणं हि द्विविधं
ध्वनेर्वर्णस्य च तत्राद्यप
टत्कृतेती त्यादि द्विती
यं भुवो वुगित्यादौ भूश
ब्दादि

१३

पतद्वाक्यात्पूर्णमना
ऽनुकरणेभ्यो नानुस्व
साधुतायाः सर्वेषा
मुपगमादित्यर्थः
अनुकरणशब्दत्वा
द्भाषामकानुकर
णशब्दस्यैवासाधु
त्वशङ्कास्यात्तद्या
वृत्तयेऽस्यमुक्तम्

बोधकत्वरूपशक्त्या:—

अयं तयोर्निमित्तस्य समवायानुपपत्तिः निरूपकतायतानुत्तरसम्बन्धेन च निमित्तवशाद्बोधविषयत्वं कल्प्यत इत्यनवद्यम् ॥ सम्बन्धस्योभयनिरूप्यत्वान्नामार्थस्येव नेह द्योतकत्वेन स्वस्यापि ज्ञानसंभवाच्चेति उक्तं च वाक्यपदीये ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा तथैव सर्वशब्दानामेते पृथगवस्थिते इति विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यत इति चेति । प्रसङ्गादन्यकार्यान्तकरणे प्रयोजनं साधकमाह अनन्वग विद्यामूपसंख्यायामितीष्यते न प्रातिपदिकेनापि पदे साधुत्वलक्षणम् ३ । एवं समयमाह भूसंज्ञायामित्येवमादयो व्याकरणशास्त्रस्थकार्यान्तराभिप्रायेण अतस्तेषामर्थवत्त्वाद्यभावादर्थवत्सूत्रात् प्रातिपदिकत्वप्रसङ्गे नो न पदत्वं न वा प्रातिपदिकत्वमपि च साधुत्वमिति सूपपद्यते अन्यथा प्रत्ययः परश्च अपदं न प्रयुञ्जीतेति निषेधादिलङ्घनादसाधुतापत्तिरिति दिक् ॥ ३ ॥ इति श्रीमद्भट्टोजिभट्टात्मजकौण्डभट्टकृते वैयाकरणभूषणसारे नामार्थनिर्णयः ॥ ॥ समासान्विभजते सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः १ सुपां सुपा पदद्वयमपि सुबन्तं राजपुरुष इत्यादिः सुपां तिङा पूर्वपदं सुबन्तमुत्तरं तिङन्तम् पर्यभूषयत् अनुव्यचलत् गतिमतोदात्तवता तिङापि समास इति वार्त्तिकात् समासः सुपां नाम्ना कुम्भकार इत्यादिः उपपदमतिङिति समासः स च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति परिभाषया भवति सुबुत्पत्तेः प्राक् अग्रेऽन्तरङ्गत्वात् सुबुत्पत्तेः प्रागित्यर्थात् अन्यथा चर्मक्रीतीत्यादौ नलोपापत्तेः सुपां धातुना उत्तरपदं धातुमात्रं न तु सुबन्तम् कटप्रूः आयतस्तूः क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्चेति वार्त्तिकात् तिङां तिङा पिबत खादत पचत भृज्जता इत्यादि आख्यातमाख्यातेन क्रियासातत्ये इति मयूरव्यंसकादिगणसूत्रात् तिङां सुबन्तेन जहि स्तम्बः जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधातीति मयूरव्यंसकादिसूत्रात् अयं च षड्विधोऽपि समासः सह सुपेत्यत्र योगविभागेन भाष्ये भावितः स्यादितः स इतः शब्दकौस्तुभादौ ॥ १ ॥ स्वयं भाष्यादिसिद्धं तद्दर्शयन् प्राचीनवैयाकरणोक्तविभागस्याप्यतादिभिः सलक्षणस्य प्रायिकत्वं दर्शयति । समासस्तु चतुर्धेति प्रायो वादस्तथापरः पूर्वपदार्थादिप्राधान्यविषयः सोऽपि २ औतच्चोत्तोऽपि एवमादिवदास्थितः । चतुर्धा अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात् अयं प्रायो वादः भूतपूर्वः इभ्यः कालाभ्यः आयतस्तूः वागर्थावि

सुपदत्वादिति हेतोः =

लक्षणस्वरूप:

स्वविषयत्वं विलय

अन्यथा पूर्वपदे विस / उत्तरे नाकामा...

समासः प्रातिपदिकसंज्ञा ...

समासषड्विध्यस्वरूप / विभागः

वै. भू.
१८

प्राधान्यं पुरुषविशेषणत्वं मुख्यत्वं
मितरविशेषणानि रूपि नप्रकारतानामकत्वम्

वेमाश्रसङ्गः स्यात् यथा पूर्वपदार्थप्रधानो ऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः उभयपदार्थप्रधा-
नो द्वन्द्वः अन्यपदार्थप्रधानो बहुव्रीहिरित्यादिलक्षणम् विप्रतिपत्तिकम् उन्मत्तगङ्गम् सूपप्रति अर्द्धपिप्प-
ली द्विराः शाकाकृशपलाशमित्यादौ पर्वस्य व्यभिचारात् यथा हि उन्मत्तगङ्गमित्यव्ययीभावे पूर्वप-
दार्थप्राधान्याभावादव्याप्तिः अन्यपदार्थप्राधान्याद्बहुव्रीहिलक्षणातिव्याप्तिश्च अन्यपदार्थे च संज्ञाया-
अव्ययीभाव मिति समासात् सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च
सुप्प्रतिना मात्रार्थ इति समासः अर्द्धपिप्पलीत्येतत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्त-
त्पुरुषाव्याप्तिश्च अर्द्धं नपुंसकमिति समासात् पञ्चपूर्वकायस्मादिद्वन्द्वम् द्विरा इति बहुव्रीहावुभय-
पदार्थप्राधान्याद्द्वन्द्वातिव्याप्तिर्बहुव्रीह्यव्याप्तिश्चेत्यादिति भावः शाककृशपलाशमित्यादिद्वन्द्वे समाहारान्य-
पदार्थप्राधान्याद्बहुव्रीहावतिव्याप्तिर्द्वन्द्वाव्याप्तिश्चेत्यादिति भावः सिद्धान्ते ऽव्ययीभावाधिकारपठितत्वमव्य-
यीभावत्वमित्यादि द्रष्टव्यम् असम्भवं विशेषाणामित्याह भोजनस्यादिति रेखागवयादिनिष्ठलाङ्गलादेर्वा
स्तवपश्यलक्षणत्ववदेतेषामपि समासलक्षणे बोधकत्वात् नइदेवस्यादिति भावः २। पूर्वपूर्वपदा-
र्थप्राधान्यादिसमासे स्ववचम् यथा हि समर्थः पदविधिरिति सूत्रे भाष्यकारैरनेकधोक्तेषु पक्षेषु जह-
त्स्वार्थाजहत्स्वार्थयोरेकार्थीभावव्यपेक्षारूपयोः पर्यवसानलाभे तत्र जहत्स्वार्थपक्षे ऽन्यपदव्यवस्था-
नासंभविनी तथा हि पक्षे सिद्धत्वात् जहत्स्वार्था जहत्स्वार्थेति वृत्तिद्वैविध्ये भेदः संसर्ग उभयं चेति वा
व्यवस्थिते: १। जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था पदैरेव ऐवहूनोपदानामानर्थक्यमित्यर्थः अयं भा-
वः समासघटकैरेव राजविशिष्टपुरुषभानसंभवेन राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम् एवमुभ-
यावकादिपदेष्वपि द्वासिपदानामिव अन्यथा राजपदेन विग्रहे वाक्ये स्वराजः स्वातन्त्र्येणोपस्थितिसत्त्वा-
द्दृश्यस्य राज्ञः पुरुषस्यान्वयः स्यात् इदं स्य राजपुरुषस्य पापन्नेरिति अजहदिति न जहति पदानि स्वार्थं यस्यां
सा जहत्स्वार्था अयमभिप्रायः राजपुरुषादिसमासे नातिरिक्तशक्तिः कल्पकाभावात् तत्र राज- १८
जादिपदादेवार्थोपस्थितिसम्भवे तत्कल्पने गौरवप्रसङ्गात् शक्तिकल्पनागौरवं प्रामाणिकः
कल्प्यत तथा चाकाङ्क्षादिवशात् पदार्थैरेव विशिष्टार्थबोधः अयमेव व्यपेक्षापक्षो मतान्तरेण भाष्यका-

देरुक्तः नचात्रमतेसमासेऽस्त्रहस्येति विशेषणान्वयापत्तिः सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयो-
गो नेति वार्त्तिकात् तथा चैतन्मतवादिनां पूर्वोत्तरपदार्थप्रधानत्वमादिग्रवस्थ्यास्यूपपादमिति भावः प्रसङ्गा-
हृत्तिभेदमपि निरूपयति तेषु नरिति द्वेअपि हृत्ती त्रिविधे वाच्यत्वे विधात् वाच्यमेवाह भेदरत्यादि भेदो
ऽन्याभावः तथाचराजपुरुषस्यादाववराजकीयभिन्न इति बोधः अस्या वाच्यत्वे च राजपुरुषः सुन्दर इति
वद्राजपुरुषो देवदत्तस्य चेत्यपि स्यात् वाच्यत्वे तद्विरोधात् वप्रयोग इति भावः राजसम्बन्धवानित्यवगमाद्-
भानंभेदस्य तु न एकालमुपनिष्टत्वं स्याशयेनाह संसर्ग इति विनिगमनाविरहस्वामिकेपि राजपुरुषइ-
तिप्रयोगापत्तिंच मनसि कृत्वा पक्षान्तरमाह उभयं चेति तथा च राजकीयभिन्नो राजसम्बन्धवानय
मिति बोधः ३ । अपेक्षावादस्यैव युक्तिभाष्यविरुद्धत्वान्मूलकः एवं पदार्थप्रधानत्वमायुक्तं गौण्युक्तः
किन्तु रेखागवयन्यायेनोसर्गोपि परम्परैव बोधकत्वमाशयेन समाधत्ते समासेप्वेव भिन्नैव शक्तिः प-
कजपाचूववद् बहूनां वृत्तिधर्माणां वचनैरेव साधने गौरवं तस्मादेकार्थीभावमाश्रितः ४ । समास
इति हृत्तिमात्रोपलक्षणम् समर्थः पदविधिरित्यत्र पदसम्बन्धियो विधीयते समासादिः स समर्थः विग्र-
हवाक्यार्थाभिधाने शक्तः स साधुरिति सूत्रार्थ सभाष्यात्प्राभात् पदोद्देश्यक विधित्वं च कृत्तद्धित समासे
कशेषसनाद्यन्तधातुरूपास्तु पञ्चस्वपि हृत्तिषु स्त्येव प्रागुक्त स्वीकर्तॄणामपेक्षावादिनां मते हृत्तिशक्ति-
साधकमेवत्याशयेनाह पङ्कजशब्दवदिति पङ्कजनिकर्तरिप्रयोगादेवोपस्थितो तत्रापि समुदायशक्ति-
र्न सिद्धेत् नच पद्मत्वरूपेणोपस्थितये गौणकल्पनात इति वाच्यम् चित्रगवादिपदेपि स्वामित्वेनोपस्थितये तत्क-
ल्पनावश्यकत्वात् लक्षणयैवतयोपस्थितिरिति चेत् पङ्कजपदेपि सास्त्वस्वचा पवंरथकारपदेपि तथा च व
र्णास्वरथकारोऽग्निमादधीतेत्यत्रापि विनालक्षणां योगेन ब्राह्मणादिविषयत्वे बोपपन्नोनंतत्कल्प
नातत्वाजातिविशेषस्याधिकारित्वप्रकल्पनं सर्वविद्याकल्पनमप्युक्तंस्यादिति भावः साधकान्तरमा
ह बहूनामिति हृत्तिधर्माविशेषणलिङ्गसंख्यायोगादयः तेषां वचनैस्साधने गौरवमित्यर्थः अयंभा
वः विशिष्टशक्त्यस्वीकारेऽस्मिन्नः पुरुषस्य तु वराजपुरुषस्वत्यापिस्यादिशेषणान्वयः राजपदेन स्वत
न्त्रोपस्थितिसत्त्वात् विभाषावचनेचसमासनियमवारणायकार्यम् ननु सविशेषणानामितिवचनान्न

ऋद्धस्य राज्ञः पुरुष इत्यादौ स्वीत्वसमृद्धराजपदार्थप्रतीयमानत्वादिति भावः = राज्ञो नत्वं वा पुरुषस्यादिवाक्यो ऽपसर्जनपदानि संख्याविशेषणु
नेक्षार्थमभिदधाति समासेतन्न न तत्स्वार्थप्रधानार्थमभिदधतीति भाष्यात् तत्संख्याविशेषस्याप्रत्ययादितिभावः = सविशेषाणां वृत्तिर्नेत्या दिभिः = त

समुदायशक्तिं

निरूढलक्षणां प्रा
न्यानतिरिक्ता

अवयवशक्तेः
समुदायशक्तिः =
पङ्कजत्वरूपेणोपस्थितिः =
ललताभवाऽत्राकाङ्क्षाकाङ्क्षा
समुदायशक्तिकल्प
ना

वै. भू. विव
१५ तार्थान

यो

पदार्थः पदार्थैकदेशेनान्वेतिन्नपदार्थैकदेशेनेति न्यायः =

विभाषासूत्र

विशेषणाद्यन्वयः विभाषावचनं च कृतमेवेत्याशङ्कां समाधत्ते वचनैरेवेति न्यायसिद्धमेव सूत्रं यद्यपेक्षा वि
वक्षायां व्यासस्यैकार्थीभावे समासस्येति स्वभावतएवप्रयोगनियमसम्भवात् सविशेषणानामपि विशि
ष्टस्यार्थस्य पदार्थैकदेशेनान्वयासम्भवात् न्यायसिद्धमिति भावः अतएव व्यपेक्षापक्षे सुद्धाद्यौपगवस्य
न्यपेक्षायां सामर्थ्यं सावकाशीभावकृतोविशेषः स वक्ष्यमाणरीतिभाष्यकारेण दूषणमुक्तम् ७। तथा
भवत्वादिरोनिष्को मां विग्रो स्योहृन्नव होपुरूधानाः केयाहुः सवर्णा लब्धारो दिदर्शः स्त्रीप्रवर्णाक्यादावित
रेतरयोगादिकान्तसूक्तपूर्णिमिश्रसंज्ञातविकारस्य प्रत्ययलोपवीप्सायाद्यर्थावाचनिकोवाचारत्यतिगोरव
स्यादितिदूषणान्तरमाह चकारादिनिषेधोऽपव्हुत्वप्रत्ययनिमज्जनम् कर्तव्यं तेन्यायसिद्धत्वस्याकं तदितिस्थिति
८। आदिनाच्चनप्रणामः हृसगमनेत्यादावुपवादीनां पूर्वैकार्थानां च सञ्ज्ञेदः दूषणान्तरमाह बहुव्रीहिनिमज्जन
मिति अयमाशयः चित्रगुरित्यत्र स्वाम्यादिप्रतीतिर्बहुव्रीहि सिद्धा न च तत्र लक्षणा प्राप्तोदको ग्राममित्यादौ
तदसम्भवात् प्राप्तिकर्त्रभिन्नमुदकमित्यादिबोधोत्तरं तस्य बन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्ति
कर्मग्रामइत्यर्थालाभात् प्राप्तेतिक्तप्रत्ययस्यैव कर्मणि लक्षणेति चेन्न हि समानाधिकरणप्रातिपदिकार्थ
योरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्मेति स्यात् अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्व
यव्युत्पत्तिभङ्गापत्तेः प्राप्तेर्धात्वर्थतया कर्तृतासम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च अन्यथा देवदत्तः
पचतीत्यत्र कर्तृतासम्बन्धेन देवदत्तस्यान्वयसम्भवेनान्वयानापत्तेः अथोदकाभिन्नकर्तृकाप्राप्तिरि
तिबोधोत्तरं तस्यान्वितग्रामोलक्षणेति चेन्न प्राप्तेर्धात्वर्थतया कार्यकर्तरि विशेष्यतायाऽसम्भवात् प्रकृ
तिप्रत्यययोः प्रत्ययार्थप्राधान्यमिति सूत्रणाः प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्या एव नामार्थत्वेनोदकेन सममभे
भेदान्वयापत्तेश्च एवमूढरथः उपहृतपशुः उद्धृतोदना बहुपाचिकेमादावपिद्रष्टव्यम् अत्र हिरथक
मकवहनकर्ता पशुकर्मकोपहरणोद्देश्यः ओदनकर्मकोद्धरणावधिः बहुपाककर्त्रधिकरणमितिबो
धाभ्युपगमात् अतिरिक्तहत्रियपदेहत्वविशिष्टेवटपदस्येवोदककर्तृकप्राप्तिकर्मत्वविशिष्टेप्रोदक
रमादिसमुदायस्यैवानिर्वाहइतिभावः। ८। साधकान्तरमाह अषष्ठ्यर्थबहुव्रीहौ सूत्रमन्त्रकल्पना
स्वतन्त्यागश्चास्ति तवतलिङ्गात्तिंतकल्पयेः ९। अयंभावः चित्रगुरित्यादिषु चित्रगोस्वाम्यादिप्रतीतिर्विना

रामस्य इदं रामसम्बन्धि
विग्रहे रामकस्य
वृत्ति समासस्य चैका
र्थता समासे चकारार्थ
बोध वचनकार्यम् =

कर्तृर्यस्य

था

सर्वत्र

वार्तिकसूत्रन्यायसिद्धं

कालनग्रामादीनां =

शक्तिस्वपपद्यते नचतत्रलक्षणा स्वादिन चित्रपदे चित्रस्वामी गौरितिबोधापत्तेः नापिगोपदे गोःस्वामी
चित्रःतत्वदपबोधापत्तेः चित्रादिमात्रस्यलक्ष्यैकदेशत्वेन तत्रगवादेरन्वयायोगात् नचचित्राभिन्नागौरि
तिशक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृश्यो स्वामीगोपदेनलक्ष्यतइतिवाच्यम् गोपदस्यचित्रपदस्य
चाविनिगमनाविरहेणलक्षकत्वासम्भवात् नचगोपदेसाक्षात्सम्बन्धएवविनिगमकइतिवाच्यम् ए
वमपिप्राप्तोदकः कृतविश्वस्याद्यन्यपदार्थबहुव्रीहौविनिगमकाप्रसक्तेः यौगिकानाकर्त्राद्यर्थकतयासा
क्षात्सम्बन्धाविशेषात् नचपदद्वयेलक्षणेतिनैयायिकोक्तयुक्तम् बोधाहत्तिप्रसङ्गात् नचपरस्परं ता
त्पर्यग्राहकत्वादेकस्यैवेकदालक्षणानद्वयोरितिनबोधाहत्तिरितिवाच्यम् एवमपिविनिगमनाविर
हतादवस्थ्येनलक्षणायाअसम्भवात् नचचरमपदेएवसा प्रत्ययार्थान्वयानुरोधात् प्रत्ययानांसन्निहि
तपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरितिवाच्यम् पूर्वोक्तबहुव्रीह्यसम्भवापत्तेः अनेकमन्यपदार्थे इत्यने
नानेकसुबन्तानामन्यपदार्थंप्रतिपादकत्वेनविधानात् किंचएवंसति त्र्यादिपदेपिचरमवर्णएववा
चकताकल्पनास्यात् पूर्वपूर्ववर्णानांतात्पर्यग्राहकत्वेनोपयोगसम्भवात् एवंसतिचरमवर्णमात्रस्यैव
तदर्थबोधापत्तिरितिचेत्तत्रपदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तल्येतान्यत्रविस्तरः एवंचान्यपदार्थ
बहुव्रीहौसमुदायशक्तिरकल्पनाकृप्तेः अगत्याशक्त्यन्तरकल्पना कृप्तत्यागः कृप्तशक्त्योपपत्तिरिति
समुदायशक्तित्यागस्तववास्तिनत्किंसर्वत्रसमासेशक्तिनकल्प्यतेइतिवाकार्यः यत्तुवैयाकरणादिनैयायि
कमीमांसकादयः नसमासेशक्तिः राजपुरुषइत्यादौराजपदादेःसम्बन्धिनिलक्षणयैवराजसम्बन्ध
भिन्नःपुरुषइतिबोधोपपत्तेः अतएवराज्ञःपदार्थैकदेशतयानतत्रशोभनस्येत्यादिविशेषणान्वयःन
वाघनश्यामोनिष्कौशाम्बिर्गोरथइत्यादावित्यादिप्रयोगापत्तिः उक्तार्थतयाइवकारादिपदप्रयोगासम्भवा
त् नवाविभाषेतिस्वावश्यकत्वं लक्षणयाराजसम्बन्धाभिन्नइतिबोधयितावाक्यसमासयोराजसम्ब
न्धवानितिबोधयितायांविग्रहस्येत्यादिप्रयोगनियमसम्भवात् नापिपङ्कजपदइतिवत्पृथक्शक्तिसा
धिका तत्रावयवशक्तिमजानतोपिबोधात् नचशक्यग्रहेलक्षणयानेभ्योविशिष्टार्थप्रत्ययःसम्भवति अ
तएवराजादिपदप्रत्यग्रहेराजपुरुषशिन्नगुरित्यादौनबोधः नापिचित्रगुरित्यादौलक्षणासम्भवेव्यध
स्यार्थबहुव्रीहौलक्षणायाअसम्भवः बहुत्वमपत्तिभङ्गनायतिरितिवाच्यम् प्राप्तोदकस्यादावुदकपदेए

अन्वयोः

उत्तरपदेसर्वपदेवा लक्षणायाअसम्भवात्

बोध्यतानमस्त्वामिनः चित्रास्वामीगौःस्वामी

उत्तरपदार्थस्यैवान्यपदार्थत्वेलक्षकत्वे =

प्राप्तोदकादावुदकादिसकर्तृकत्वादिरूपशक्तिः

समासान्तर्गतपदशक्त्यावाच्योपपत्तेःशक्त्यन्तरकल्पनानावश्यकेति =

एकाआदिपदे पद्युनरितिशेषे शक्तिसिद्धाना पत्तिरूपाः समा समासेशक्तिसाधिका

४

वै.भू. १६ वर्णत्वाणांस्वीकारात् पूर्वपदस्य यौगिकत्वे तु तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसापेक्षतया विलंबि
तत्वात् प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वमुत्पत्त्यन्तरं धात्व तु राद्दिपदेचातिरिक्ता शक्तिः
कल्प्यमाना विशिष्टेकस्यैव विशिष्टस्यैव संकेतितत्वात् बोधकत्वस्यापि प्रत्येकं वर्णेषु सत्वात् प्रकृते चामा
त्रसन्निधानेन तत्सायथा त्वयसो लभ्यायोत्तरपदएव सा कल्प्यत इति विशेषः स्वीकृतं च कृदादिपदे प्रत्येक
मवर्णस्यैव वाचकत्वं मीमांसकमन्यैरित्याहुः पूर्वोक्ते समासप्राप्त्यस्वीकारेन रूपप्रातिपदिकसंज्ञानं दि.के.
स्यात् अर्थवत्वाभावेनार्थवदधातुरप्रत्ययः प्रातिपदिकमित्यस्याप्रवृत्तेः न च कृत्तद्धितसमासाश्चेत्यत्र समा
सग्रहणात्सा न स्यानियमार्थतायाभाष्यसिद्धाया वैयाकरणभूषणेस्पष्टं प्रतिपादितत्वात् समास
वाक्येप्यन्ताभावेन राजपुरुषस्य अपदलक्षणायाश्चाप्यसम्भवेन लाक्षणिकार्थवत्वस्याप्यसम्भवात् अथ
तिन्नस्रूजि इत्यारम्भस्तोस्त्विति तिष्ठत्याहारोभाष्यसिद्धः तस्मादायाति प्रातिपदिकमित्येव स्वयता
य कृतमर्थवदादिसूत्रद्वयेन समाससग्रहणं चनियमार्थमस्तु तथाचातिरिक्तितवन्नभिन्नप्रातिपदि
कमित्यर्था समासस्यापि सा स्यादिति चेत्तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्वावश्यकत्वे तु समा
सव्यावृत्तिताद्वस्थ्यमेव तथा च प्रातिपदिकसंज्ञारूपकार्यमेवार्थवत्त्वमनुमापयति धूम इव वह्निम्
किञ्चैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः वि
शिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् पदार्थसन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव
त्यन्तरतितत्र उपकुम्भमर्द्धपिप्पलीत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् न च तत्रापि सन्निधा
नमेव अव्ययीभावसनिकसन्निधेर्विवक्षितत्वात् तथा च यत्पदोत्तरं यावद्विभक्तिसाल्लदर्थगतस्वार्थबोधयति
समासे च समस्यमानपदोत्तरमेवाव्ययासन्निमितिवाच्यम् अर्थवत्सूत्रे विशिष्टस्यैव प्रातिपदिकत्वेन विशि
ष्टोत्तरमेव विभक्त्युत्पत्तेः सत्वात् अत्र प्रकृतितावच्छेदके विभक्त्यर्थान्वयस्य रेवकल्पनत इति चेन्नर्द्धिपद्धजुमान
यदाविनैपथ्यपत्रितिन्भूजयेत्यादौ पक्षं दुरुस्फुलेषु नयनदर्शनमज्जनादेरन्वयप्रसङ्गात् राज्ञ इति येन
त्रद्वृष्ट्या नयनान्वयापत्तेश्च रच्चदरूपादीनां विशेषणतया नत्रानयनाद्यन्वयः पाकाद्गीलः धर्मीत्त्व नीलरूपवान् स्थूलवान्
त्वादौ पाकधर्मादिजन्यतायाहिर्पस्ये घादावनन्वयप्रसङ्गात् यत्र प्रकृत्यर्थे तं तज्जन्यत्तानविवयत्वमात्रं १६
तत्त्वान्नाविरुद्धमिति तत्र घटं पश्येत्यत्र तत्पदार्थसमवायेनोपस्थिताकाशवारणाय तस्य प्रकृत्यर्थत्वस्य

प्रातिरि त्वाजारान्नीकारे वै.
समासस्य प्रकृतित्वे
तस्यवार्थवत्वाभा
वात्

अथ विशेषणविशेष्यभावेनान्वयनीतिः प्रथमं लक्षणमत इत्यर्थः = एवमग्रेऽपीति उद्देश्यविधेयभावेनान्वयोऽपि उपस्थितेस्तत्र तथा तदनुरोधेन तदभ्युप
गमे समासे विशिष्टार्थोपस्थिति तु न कल्पते एकप्रसरताभङ्गापत्तेरित्यर्थः न च मीमांसकैर्विशिष्टशक्तेरनभ्युपगमात् कथमेतदिति वाच्यम् प्राक्
तनभ्युपगमेऽपि विशिष्टे लक्षणया तेनाभ्युपगमेनैकप्रसरताघातान्नातिप्रसङ्ग इत्याह = १२

वश्यकत्वात् अथ अव्युत्पन्नायं वृत्तिर्यज्जन्योपस्थितिविषयत्वं प्रकृत्यर्थत्वमिति चेन्न गामानयेति कृत्स्नोद्देश्ये
नेत्यत्र हस्ते तृतीयार्थान्वयप्रसङ्गात् अथ समस्यमानपदार्थगतत्वार्थबोधकत्वं समासोत्तरविभक्तेः क
ल्प्यत इति चेन्न अलुक्समस्थलेऽन्यत्र च समुदायशक्तिकल्पने स्वेवयुक्तत्वादिति दिक् अपि
च समासे विशिष्टशक्त्यस्वीकारे राजपुरुष इत्यत्र यतीनां नीलोत्पलमित्यादौ विभक्त्यभावात्सर्वत्रानन्वयप्रसङ्गः
राजपदादेः संबन्धिनि लक्षणायामपि तण्डुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्व
यवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुतायाः आवश्यकत्वात् स्वरूपादेस्तथा
त्वाभावात् न तण्डुलः अप्रथमान्तादौ च प्रातिपदिकार्थकप्रथमार्थेन तण्डुलादेस्तस्य च तण्डुलादिविशेष्यप्रथमार्थ
स्य पक्षे अभेदेनैवान्वयः मुख्येन तण्डुलेनेत्यादौ च विशेषणविभक्तिरभेदार्था पार्ष्ठिकोवान्वय इति नातिप्र
सङ्गः न च समासे परस्परमन्वयासम्भवात् उपपदार्थके वसमुदायस्य तादृशे विशिष्टार्थे शक्तिः किञ्च रा
जपुरुषवत् राजः सम्बन्धिनि सम्बन्धे वा लक्षणा नाम्नः राज्ञः पुरुष इति विवरणविरोधात् समासमानार्थ
कस्य वाक्यस्यैव विग्रहत्वात् अन्यथा तस्माल्लक्षणानिर्णयो न स्यात् नान्नः राजसम्बन्धिरूपः पुरुष इति वि
धप्रसङ्गात् विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयबोधस्य मन्नेरित्यादि प्रपञ्चितं वैय्याकरणभूषणे
भूतपदवषट्कृतः प्रथमभक्षस्समत्वं नभ्यास्तु द्विषण्याप्रयाविधानं पुंत्रमेकप्रसरत्वभङ्गापत्तेरिति तृतीये
ऽर्थे स्विष्टकृतं यजतीम वाङ्गास्तवादेन नवित्वाविधानं पुक्तमेकप्रसरताभङ्गापत्तेरिति दशमे च निरूपितं सङ्ग
च्छते सङ्कल्पे चारुणाधिकरणारम्भः अन्यथारुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणातीत्यत्रारुणपदवि
भक्त्योरपि प्रकारतादिरूपमात्रवाचकतया अमूर्तेन तल्लीनो करणत्वासम्भवस्य तुल्यत्वादारुण्यस्यैव
वाक्याङ्गेद्वयानाया असम्भवादिति प्रपञ्चितं भवति तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्यमभ्युपेयइ
त्यलं विस्तरः ।६। राजपुरुषइत्यादौ राजा चासौ पुरुषश्चेत्येव विग्रहः चित्रगुरित्यादौ च चित्रा गावो यस्याम
यमित्येव समानार्थत्वादरीधात् यद्यपि प्रथमान्तानामेव बहुव्रीहिरिति बोधो बहुव्रीहिरिति सूत्राभावेऽर्थ
ति प्रथमान्तेन पदेन वाक्यं चित्रगावो यस्येत्येवं सम्भवत्येव षष्ठीति समासविधाना द्वात्रः पुरुषस्तिष्ठ पदे वाक्यंत
थापि तस्य न विग्रहत्वं भिन्नार्थत्वात् किन्तु कस्येति मीमांसकास्तत्र समस्तास्त्रिरस्यति आख्यातं तद्धितकृतो
र्यत्किञ्चिदपदार्थं कुत्र गुणप्रधानभावादौ न बहुशो विपर्ययः ।७। तद्धितकृतोर्यत्किञ्चिदर्थबोधकं विवरण

विवरणवाक्य राजा चासौ पुरुषश्च चित्रा एणां गावा यस्येति =

= ६ अथ अरुणया सदा ... प्रकरणे निर्देशे ... [illegible] ... विशेषण ... सम्भवति ...
किं पदे ते ... सर्व पदार्थाशयः पर्यन्त ... अरुणस्य ... वाक्याङ्गे ... [illegible]

करणत्वा
द्रव्यस्यापि तिस्रः
यागार्थाविधिपदार्थ
त्वादिति भावः = २

प्रातिपदिकार्थलि
ङ्गपरिमाणवचन
मात्रे प्रथमा =

= समासे एकार्थी
भावः अभ्युपगमादिव
समासशक्तिस्वीकारे

राजसंबन्धिनि
लक्षणा

विभक्तिजन्योपस्थि
तिविषयत्वम

अजहत्स्वार्थको
मानसबोधः

विशिष्टार्थोप
स्थितिजनकत्व

तिस्रः

वै. भू.
१८

माख्यातं तत्र विपर्ययो दृष्टः तथाहि प्रातिकः कुम्भकारस्य त्वत्रात्त कारणिकाव्यापाराश्रयः कुम्भानुकूल
व्यापाराश्रय इति बोधः अन्ते दीपमति कुम्भं करोतीत्यत्रात्त कारणिकादिवनानुकूलभावनाकुम्भोऽत्यन्त
कूलाभावनेति बोधः कृत्प्रत्यये कारकाणां माख्याते भावनायाः प्राधान्यवदतो मीमांसकस्यापि पितृपुत्र
प्रधानभावांशाव्यत्यासेन विवरणं तु बाधकम् इति नात्र पातिकस्य विग्रहाभावो सेत्यादेर्विग्रहत्वे बाधकमस्ती
ति भावः ॥ ७ ॥ ननु समस्तकरीत्या सर्वत्र समासे शक्तिरस्तु चतथापि विग्रहस्यापि गृहीतसमुरुषकर्मधारययोः
विशिष्टशक्ति शक्तिमत्वाविशेषान्निषादस्थपत्यधिकरणसिद्धान्तविरोध इत्यादि स्यात्तमाह । पर्यवसन्नाद्बोधाद्विग्रह
प्राक्तनाः स्थिते । या शक्तिग्रहे तत्र कृत्ववद्विरङ्कवचित्तनम् ॥ ८ ॥ पर्यवसन्नः श्रामो शाब्दबोधस्तस्मादविग्रह
सौ प्राक्तनश्चेतदानीतनं लाघवमादाया धिकरणविरोध इत्यर्थः अयंभावः निषादस्थपतिपदं समासश
क्तिपन्ने निषादरूपे निषादानां च स्थपतौ निषादस्वामिके प्ररूषान्तरे चेत्येवं सर्वत्र शक्तत्वान्नानार्थम् तथा च ल
नार्थतान्यथा हि स्त्रोषाद्गानितिरितिन्यायेन तत्कल्पनीयं पदद्वये नपदैकोपस्थितार्थयोरुपस्थित्यादि लाघवोत्र
तत्कल्पनरूपि रेषामपि सन्निताव्यर्थषष्ठीः प्रवेश्य येति वत्तन्नणायादुर्बोरत्वात्तन्मयमेवकल्पकोटावनर्धि
ष्टतरमिति दिक् ॥ ८ ॥ इति वैयाकरणभूषणसारे समासशक्तिनिरूपणम् ॥ ॥ ॥ श्रीः ॥ ॥ श्रीः
शक्तिप्रसङ्गात्तस्याः स्वरूपमाह इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा अनादिरर्थैः शब्दानां सम्बन्धो यो
ग्यता तथा ॥ १ ॥ इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषादिज्ञत्वादिषु यथानादिर्योग्यता तदीयचा
क्षुषादिकारणता तथा शब्दानामर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिरित्यर्थः ननु न बोधकार
तत्र बोधकारणत्वेऽनादित्वाबाधादिमर्थः = णत्वमनादिस्थितशक्तिः आधुनिकदेवदत्तादिपदे तदभावात् अन्यथा पित्रादिसङ्केताज्ञानेपि तदन्वयबोधप्र
सङ्गः लौकिकास्तु नित्यायेश्वरसङ्केतज्ञानमपि हेतुर्वाच्यं तथा चावश्यकत्वात्स एव शक्तिरस्तु स चाधुनि
केपित्रादेरीश्वरादेश्चेश्वरस्येति चेत् अत्रोच्यते सङ्केतो न स्वरूपेण हेतुः अगृहीतसङ्केतिकार्थबोधप्रसङ्गात्
नापि सामान्यतो ज्ञातः प्रमेयत्वादिना तज्ज्ञानेपि बोधप्रसङ्गात् नापि सङ्केतत्वेन तज्ज्ञानं हेतुः गवादिपदे
अर्थधीजनकता श्वरीयसङ्केतत्वेन तज्ज्ञानस्यानां लौकिकमीमांसकादीनां तदर्थबोधजनकत्वग्रहवतामेव बोधा
निरूपिताया विषय न्वयव्यभिचारात् तत्तदर्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं हेतुः तत्तोपि लाघवेनार्थधीजनकत्वेनैव हेतुता
तासंबन्धावच्छिन्न यामस्त्वन्वयतसिद्धेः न चाधुनिकदेवदत्तादौ सङ्केतज्ञानादेव बोधेनास्य व्यभिचारः तत्रापि दिष्टपदमिन
वच्छेदकता तया =

दिपदे । संकेतज्ञानं २ संकेतज्ञानमाबाद

वै
कर्मधारयेत्यलं नं
निषादरूपे निषादानां
स्थपतौ निषादस्वामिके ल्मः

संकेतनिरपेक्षस्यैव तस्याः
बोधहेतुत्वमर्थः =

संकेता

दयेः
संकेत
ज्ञानस्य

ईलोपस्य तोपि =

तस्य च विशेष्यकत्वं तदर्थबोधकत्वप्रकारकसंकेतग्रहे ज्ञानेच्छादिविषयक ज्ञानस्य तद्विषयविषयकत्वनियमादिति भावः। विषयीकरणेन॥ इतराऽविशेषणत्वेन इममर्थं बोधयत्विति पदार्थबोधकत्वस्येच्छाविशेषणत्वेन भा ...

मर्थं बोधयत्विति नीलादिशब्दे हि पदे तु तदर्थबोधकत्वस्यावगाहनेन व्यभिचाराभावात् न च स्वातन्त्र्येण बोधकता ज्ञा
ने कारणं वाच्यम् अन्यथा सैन्धवादिजनकमिति ज्ञानतो स्मात् ... दयमर्थो बुद्धोऽनेनेति ज्ञानतस्तद्बोधाप
त्तेरिति वाच्यम् तेन तद्धीजनकमिति ग्रहवतो बोधे न पदे परग्रहं ज्ञानतोपि तद्बोधासम्भवात् अन्यथा
तिप्रसक्तेरिति इदं चार्थधीजनकत्वमित्यादि ... तत्ता ... ज्ञानान्तर्गतं बोधः ना
पि लाक्षणिको हेतुदापत्तेः इष्टत्वात् शक्तिग्राहकव्यवहारस्य ... साधारण्यात् किञ्च ... दि
शोपस्थितेः शाब्दबोधाङ्गत्वात् शाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणजन्योपस्थितेश्च कारणत्वं वा
च्यम् तथा च कार्यकारणभावद्वयकल्पने गौरवं स्यात् अस्माकं पुनः शक्तिजन्योपस्थितित्वेनैव हेतुत्वे
तिलाघवम् अपि च लक्षणाङ्गीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः शक्तिजन्योपस्थितिं वि
नापि लक्षणाजन्योपस्थितेः शाब्दबोधात् न चात्र वह्निमत्त्वसम्बन्धेन ... उपस्थितिमत्त्वं कार्यतावच्छेद
कं तत्तदुपस्थितित्वं च कारणतावच्छेदकम् अनन्तकार्यकारणभावप्रसङ्गात् किञ्च पदार्थोपस्थितित्वस्य वि
शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुत्वे तत्तद्व्यभिचारे गौरवं च शब्देव ... नचेदं पदमेतदर्थबोधकमि
ति शक्तिज्ञानकार्यकारणभावकल्पनेपि पदतदर्थभेदेनानेककार्यकारणभावकल्पने गौरवं तुल्यमपि
समानम् परस्परं व्यभिचारवारणाय व्यवहितोत्तरत्वनिवेशे च गुरुतरमिति वाच्यम्। शक्तिधर्मावरोधेन तत्त
त्पदतदर्थभेदेन कार्यकारणभावानन्त्यस्य तवापि साम्यात् लक्षणे कार्यकारणभावकल्पनागौरवं परं
तवातिरिच्यते अपि च शक्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता शक्तिज्ञानत्वेन पदार्थोपस्थितिप्रति कारणता
त्वेवं मया वाच्यमिति चेन्न शक्तिलक्षणान्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थितित्वेन हेतुत्वपदपदार्थसम्बन्ध
त्वस्य वा हेतित्वस्य कारणतावच्छेदकत्वात् शक्तित्वमपेक्ष्य गौरवात् शाब्दबोधहेतुतावच्छेदकस्य पदार्थो
पस्थितिहेतोरज्ञाने तद्घटितकार्यकारणभावग्रहस्यासम्भवात् शाब्दबोधहेतुता अस्यममापि शक्तिज्ञानत्वे
नैव हेतुतास्माकं सम्बन्धत्वलक्षणायाः शक्तेरपि प्रवेशादिति चेन्न शक्तिग्रहं पदार्थोपस्थित्योः कार्यकारण
भावे समानविषयत्वस्यावश्यकत्वात् अन्यथा गङ्गातीरयोः सम्बन्धाग्रहवतो गङ्गापदशक्तिज्ञानतोपि
गङ्गायां घोष इति वाक्यात् तीरबोधप्रसङ्गः शक्तिज्ञानस्य हेतोः सत्त्वात् अपि च घटमानयेति वाक्याद्व्यक्तिं न च
स्वतो हि तदा पदादि ... ज्जा ... लक्ष्यवत्सम्बन्ध ... नयन ... लक्षणाया वादि

कारणतावच्छेदकोपस्थितिमत्त्वेन कारणतावच्छेदकं तेन कारणतावच्छेदकस्य च वृत्तिहादितीयाऽज्ञानतावृत्तिकं स्यात् हेतुकारणतावच्छेदकतां ग्रहेतावत् शक्तिज्ञाने ... नैस्वापेक्षणादितान्वयविशेषणवृत्तिताऽसम वादिरूपसि ...

शक्ति

वाक्यत्वस्य ... प्रामाण्यं ... लक्षणाजन्योपस्थितेः शाब्दबोधाङ्गत्वात्

प्रत्यक्षलिङ्गतो न स्तव सेव्यपेन शक्तिजन्योपस्थिति सहकृतबोधं प्रति शक्तिजन्योपस्थितेः कारणत्वं लक्ष

ज्ञान

बोधजनकता ... लक्षणास्वीकारे इति

प्रयोज्य
जन्यजन्यात्मकस्य तस्योपादानेन तादृशोपस्थित्यसंग्रहः सादाजन्यत्वस्य निवेशे जन्यजन्योपस्थित्यसंग्रहः
स्वरूपसंबंधरूपस्य तु तस्योभयसाधारणत्वं प्रागेवासंभावितमिति भावः = ४

ज्ञानस्यापि=

वै.भू.
९८

18

शाब्दबोधापत्तिः समस्तालम्बनरूपोपयोगपदार्थोपस्थितेरपि निजन्यत्वसत्त्वात् तथा च विषयतया शाब्दबोधं प्रति तं प्रति विषयकवृत्तिजन्योपस्थितिर्हेतुरिति वाच्यम् एवं च लक्षणाया अपि शक्तिज्ञाननैतेन हेतुत्वं न सम्भवतु क्तिकमिति एतेन शक्तिप्रयोज्यैवोपस्थितिरिति निलक्षणाज्ञानकार्यकारणभावान्तरस्य पीति परास्तम् प्रयोज्यत्वस्यातिप्रसक्तत्वाद् इवं च तत्त्वाच्येत्यादि विस्तरेणाग्रप्रपञ्चितं भूषणे ।१। नन्वेवं भाषादितो बोधदर्शनात्तद्बोधकतारूपा शक्तिस्तत्रापि स्यात् तथा च साधुतापि स्यात् शक्तत्वस्यैव साधुतया व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा समाधत्ते । असाधुरनुमानेन वाचकः कैश्चिदिष्यते वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः ।२। असाधुः गाव्यादिः अनुमानेन साधुत्वभ्रममादाय वाचकः बोधकः कैश्चिदिष्यते तथा च लिपिवत्तेषां साधुस्मरणप्रयोजकतयोपयोगो न तत्साक्षाद्वाचकत्वमतो न साधुत्वमिति भावः उक्तं हि वाक्यपदीये ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ते यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ नन्वपभ्रंशानां साक्षादवाचकत्वे किं मानं शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेत् सत्यम् तत्र हि एषा भेदेन भिन्नभिन्नेषु शक्तिकल्पने गौरवात् नचपर्यायवत्स्वन्तताशङ्क्या तेषां च सर्वदेशैकत्वाद्विनिगमनाविरहेण सर्वत्र शक्तिकल्पना तद्वदपभ्रंशेऽतथा अन्यथाभावाणां पर्यायवत् पाठनापत्तेश्च एवं च शक्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतं तन्मतेनैव दूषणम् ॥ इदानीं स्वमतमाह वाचकत्वाविशेषेऽपीति अयं भावः अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् न च साधुस्मरणात्ततो बोधः तानविदुषां पामराणामपि बोधात् तेषां साधोरबोधाच्च न च शक्तिभ्रमात्तेभ्यो बोधः बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात् ईश्वरेच्छाया शक्तिरिति मतेऽपि सम्भावि विषयिताया स्वाबाधाभावात् शक्तेः पदपदार्थविशेषणहितायां भ्रमासम्भवाच्चेति उक्तं च वाक्यपदीये पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु प्रसिद्धिमागता येषु तेषां साधुरवाचकः दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्ययः इति अवाचकः अबोधकः बुद्धिविपर्ययः एत एव वाचका नान्ये इति विपर्ययः तदर्थः किञ्च विनिगमनाविरहाद्भाषायामपि शक्तिः न च तासां नानात्वे दोषः संस्कृतवन्महाराष्ट्रभाषायाः सर्वदेशैकत्वेन तस्यैकं विनिगमनाविरहात्तादवस्थ्यात् किं चाग्रेऽपदेवहे

कारिकामतेन मे

वाहाविनत्ववादिनां वाचकतानियोरे भाषा शब्दे

ण

न प्रतिपाद्यते

साधुपर्यायात्

अपभ्रंश अर्थानां किं तु भाषाशब्दपद संस्कृते महाराष्ट्र देवः

बोधकतायाः

दिका साचपर्याये ष्विव भाषाणां मध्यन्यान्येवेति कस्तत्पर्योर्विशेष इति विभाव्यं सुधीभिः तथा च संस्कृतव
द्भाषायाः सर्वत्रैकत्वेन प्रत्येकशक्ता अशक्ता एव न च पर्याय तया भाषाणां गणने नापत्तिः साधूनामेव कोशा
दौ विभागाभिधानात् नन्वेवं साधुता तेषां स्यादित्यत आह नियम इति ७ एतज्जनने बोधनाय साधुर्नासाधुरि
ति विज्ञस्यामिति विधिः पापजनन बोधनाय नासाधुरिति निषेधः तथा च पुण्यजनने योग्यत्वं साधुत्वम् पाप
जनने योग्यत्वमसाधुत्वम् तत्र जनकताव च्छेदिका च जातिः तदनुमापकं च कोशादि व्याकरणादि च एवमेव च राजसू
यादेर्व्रीह्यादेः फलाजनकत्वेऽपि स्वर्गादिशब्दानां नानाव्यक्तीनां साधुत्वमिति संगच्छते आधुनिकैर्वदन्नादि नाम्नामपि स्वत्र इमि
त्यादिभाषणेन च स्वादिना साधुत्वम् एवं च यः शब्दो यत्रार्थे व्याकरणे स्मृत्यादिना स तत्र साधुरिति पर्यवसितम् गो
णीनां तु गोत्वस्य तदन्नास्त्वस्कारेण प्रवृत्तेः साधुत्वमेव आधुनिक कल्पितानां त्वसाधुत्वमिष्टमेव अत एव त्रीणि
णेयोः पदे हीत्यर्थे त्रिप्रत्ययादिकं लक्षणे पाप्यसाधुरित्यादि विस्तरेण प्रपंचितं भूषणे शक्तिः शक्तेरन्य
पायमाह ॥ संबन्धिमात्रे संबन्धो योग्यतां प्रति योग्यता समया बोध्यता सचिन्मात्रा पि त्रादिनियोगवत् । संबन्धोविं
षयः योग्यतां प्रतियोग्यता शब्दप्रतियोग्यताविषय इति समयाख्यवहाराद्योग्यताम्बिन शक्तिग्रहः वृत्तपद्म नयो
र्यमेव स वंधीति व्यवहाराप्ताग्राह्यत्यर्थः इति भूषणसारे शक्तिनिर्णयः नञर्थमाह नञ्समासे चापर
स्यप्राधान्यात्सर्वनामता आरोपितत्वं नञ्द्योत्यं तदाहस्तादिति सर्ववत् १ नञ्समासे परस्योत्तरपदार्थस्य प्राधान्यात्स
र्वनामता सिध्यति तनिषेधः आरोपितत्वमेव नञ्द्योत्यमित्यभ्युपेयमिति शेषः अयंभावः असर्व इत्यादावारोपि
तः सर्वशब्दस्य सर्वपाद्वयप्राधान्याद्यासर्वनामतासिध्यति अन्यथा तिसर्वस्मै त्र्वसौस्मात् इदं नास्तीत्यादावभाव
विषयकबोधे तस्य विशेष्यतायामदर्शनात् अस्मदीत्यादावस्मात्पर्योपोधो मानसः तथा चासर्वस्मै इत्याद्य सिद्धिः प्रसंगः
इति अत्रत्वारोपितत्वमारोपविषयत्वं आरोपमात्रमर्थो विषयत्वसंसर्ग इति निष्कर्षः द्योत्यत्वोक्तिर्निपातानां द्योतकत्व
मभिप्रेत्य १ वृत्तौ नास्त्याव्ययीभावादारोपबोधस्य सर्वानुभवविरुद्धत्वाच्चानन्तरमाह अभावो वा तदर्थोऽस्तु भा
